THE JOURNAL OF
THE TANJORE SARASVATI MAHAL LIBRARY

EDITED BY

S. GOPALAN, B. A, B. L.,

Hony. Secretary, T. M. S. S. M. Library.

Vol IX

No. I

Published with the permission of
The Administrative Committee of the Library.

1953

Annual Subscription Rs. 2. Single Copy As. 12

LIST OF PUBLICATIONS OF

THE TANJORE MAHARAJA SERFOJI'S SARASWATI MAHAL LIBRARY, TANJORE.

Sanskrit Publications.

1.	Gita Govinda of Jayadeva with Abhinaya		2	0
2.	Ayurvedamahodadhi—Annapanavidhi of Sushena		1	4
3.	Dharmakutam—(Sundara Kanda)	Half Calico	4	0
		Full Calico	4	8
4.	Jatakasaradipa by Nrisimha	Calico	14	0
		Ordinary	13	8
5.	Vishnutattva Deepika of Varkhedi Timmannacharya		2	0
6.	Sangeeta Darpanam of Chatura Damodara		3	0
7.	Bijapallavam (In the Press)		......	
8.	Sahendra Vilasam By Sridhara Venkatesa (AYYAVAL)		3	0
9.	Chola Champu Edited by Dr. V. Raghavan, M. A. PH D.		1	0
10.	Aswasastram with coloured illustrations	Rs. 14 ; 11 ; 10 and	9	0
11.	Samrajya Lakshmi Peethika		8	0

Sanskrit—English Publications

12.	Mudrarakshasa Nataka Katha of Mahadeva	2	8

Sanskrit-English—Tamil Publications

13.	Viswakarma Vastu Sastram with commentary (In the Press)	......	

Sanskrit—Tamil Publications.

14.	Rajamriganka with Tamil Translation	2	8
15.	Anandakandam with Tamil Translation	15	0
	Sanskrit alone.	10	8
	Tamil Translation alone.	5	8
16.	Nadee Chakram with Tamil meaning (In the Press)	......	

Sanskrit-Tamil—Marathi—English Publications.

17.	Natya Sastra Sangraha (To be issued)	......	

CONTENTS.

No.		Pages
1.	Our Exchanges.	
2.	EDITORIAL	I–2
3.	वैयाकरणसिद्धान्तकौमुदी–भट्टोजिदीक्षितकृता An Analysis in English by the late P. V. Naganatha Sastri, continued from VIII No 3.	37–42
4.	लक्ष्मीकटाक्षम् — தமிழ் உரையுடன்.	13–16
5.	श्रीमद्भगवद्गीता— माधवस्वामिकृत मराठीभाषान्तर ।	17–24
6.	ताननिघण्टुः	21–24
7.	कविकर्पटिका— श्रीवादीन्द्रकविविरचिता	1–8
8.	श्रीशिवपादकमलरेणुसहस्रे— शास्त्रपद्धतिः	17–18
9.	,, योगपद्धतिः	19–20
10.	,, विश्राणनपद्धतिः	21–23
11.	Books Received.	1–3
12.	पारिजातनाटकम् — श्रीकुमारतातदेशिकैः प्रणीतम् (प्रथमोऽङ्कः)	1–16
13.	राघवचारितम् — (द्वादशस्सर्गः) शरभेन्द्रमहीपतिविरचितम् ।	1–9
14.	Review	1–2

OUR EXCHANGES,

1. The Indian P. E. N. Bombay.
2. The Divine Life.
3. Mysore Informatiou Bulletin.
4. Madras Information.
5. The Journal of Oriental Research, Madras.
6. The Journal of University of Bombay.
7. Bulletin of the Govt. Oriental Manuscripts Library, Madras.
8. American Newsfile of the U. S. Information Service.
9. Journal of the Travancore University Oriental MSS. Library.
10. Agra University Journal of Research, Agra.
11. Tirumalai Tirupathi Devasthanam—Monthly Bulletin.
12. Commonwealth Today.
13. Fortnightly Review of News and Events of the British Information Service.
14. Power.
15. Journal of the Annamalai University, Annamalainagar.
16. The Adyar Library Bulletin.
17. Journal of Sri Venkateswara Oriental Institute, Tirupathi.
18. Journal of the Oriental Institute, Baroda.
19. Britain Today.
20. Annals of the B. O. R. Institute, Poona.
21. Sen Tamil. (Tamil)
22. Ganasambandam. (Tamil)
23. Tamil Pozil. (Tamil)
24. Vaidya Chandrika. (Tamil)
25. Eeelakesari, Ceylon. (Tamil)
26. American Reporter—Tamil Edition.
27. Kootturavu Thondu. (Tamil)
28. Vijayavani—(Telugu) Vijayawada.
29. Kinnera. (Telugu Monthly) Madras.
30. Traimasik—Bharata Ithihasa Samshodhak Mandal.
31. Samshodhak.
32. Quarterly Journal of the Mythic Society.

33. Jaina Siddhanta Bhaskar & Antiquary.
34. Udyana Patrika, Tiruvaiyaru.
35. UNESCO Bulletin for Libraries.
36. Dharma Chakram, Sri Rama Krishna Tapovanam.
37. Matru Seva, (Telugu Weekly) Madras.
38. Sutantiran, (Tamil Weekly) Colombo.
39. Electolite, Tennur, Tiruchirapalli.
40. Bulletin of The Ramakrishna Mission Institute of Culture, **Calcutta.**
41. The Indo—Asian Culture, Hyderabad House, New Delhi.
42. Sarvodayam, (English and Tamil Editions) Devji Colony, **Tiruppur.**

19.	Sarabendra Vaidyamurai Garbhini Balaroga Chikitsai	Half Calico	3	0
		Full Calico	3	8
20.	Sarabendra Vaidyamurai Nayana Roga Chikitsai	Half Calico	3	0
		Full Calico	3	8
21.	Sarabendra Vaidyamurai—Pandu kamalai Chikitsai		2	0
22.	Sarabendra Vaidyamurai—Swasa kasa Chikitsai		2	8
23.	Sarabendra Vaidyamurai—Siroroga Chikitsai		3	0
24.	Sarabendra Vaidyamurai—Nirizhivu Chikitsai	Half Calico	4	0
		Full Calico	4	8
25.	Sarabendra Vaidyamurai—Vrana Roga Chikitsai		6	4
26.	Sarabendra Vaidyamurai—Jvara Chikitsai		5	12
27.	Sarabendra Vaidyamurai—Vataroga Chikitsai		3	8
28.	Breeding and Treatment of Cattle, Horses and Fowls (Madugal Kudiraigal, Paravaigal-Lakshanamum, Vaidyamum) (Out of stock)		2	0
29.	Konganar Sarakku Vaippu. Synthetic processes		1	0
30.	Ramayyan Ammanai—A Historical Ballad in Tamil		1	0
31.	Perundevanar Bharatam } Editor Sri S. Muthuratna Mudaliar		1	8
32.	Sivayoganayaki Pillaittamizh } Editor Sri S. Muthuratna Mudaliar		2	8
33.	Three Tamil Operas Editor :—Kee-Va-Jagannathan		2	4
34.	Nammalvar Tiruttalattu		1	0
35.	Folk Songs in Tamil (In the Press) From Percy Macqueen's collections			
36.	Thiruvaimozhi Vachakamalai		6	0
37.	Thalasamudram (In the Press)		......	
38	Bharatam (In the Press) Being an old Tamil treatise on Dance		......	
39.	Sarabendra Vaidya Ratnavali (In the Press)		......	
40.	Tirukkovaiyar (Thiruchitrambalakkovaiyar)	Half Calico	7	8
		Full Calico	8	0
41.	Naladiyar Uraivalm with 3 commentaries, 2 Vols. Rs. 6-8 and		6	0

Marathi Publications.

42.	Loka Git. Editor:-Sri A. Krishnaswamy Mahdic Rao Saheb B.A.,	1	0
43	Devendra Kuravanji by Serfoji Raja	1	4
44.	Satyasandha Vijaya By Koneratmaja Ed. V. Srinivasachariar B A.,	1	4
45.	Slokabaddha Ramayana by Sri Madhavaswami	1	8
46.	Selections From the Literary Works of the Maharajas of Tanjore in Sanskrit and Marathi	~~10~~	~~0~~
47.	Bhaktavilas (Lives of the 63 Nayanmars) By Virupaksha Edited By V. Srinivasachariar B. A.,	10	0

48.	Ramamrita Taranga By Rama Pandit	3 8
49.	Sarabendra Vaidya Ratnavali	10 0

Marathi—English Publications.

50.	Pratapa Simhendra Vijaya Prabandha By Ramakrishna Kavi Pandit	1 0
51.	Sarabendra Tirthavali and Lavani with Notes Etc,	3 8
52.	Gaja Sastra Sara (In the Press)	......
53.	Pakshi Lakshana and Chikitsa and Yujanama (In the Press)	......
	(52 & 53 in the same Volume)	

Marathi-English—Tamil Publications.

54.	Dora Dharun Goph Veni Ghalachya Paddhati	1 0
55.	Bhonsle Vamsa Charitra	2 8

Telugu Publications.

56.	Sri Ramayanamu (Dwipada) Vol. I Bala & Ayodhya Kandas	10 0
57.	Do. Vol. II Aranya & Kishkindha Kandas Full Calico	7 0
58.	Do. Vol. III Sundara Kanda	4 0
59.	Do. Vol. IV Yuddha Kanda	7 8
60.	Taladasapranapradeepika By Poluri Govinda Kavi	1 8
61.	Andhra Kamandakamu By Zakkaraju Venkata Kavi	2 8
62.	Mairavana Charitra By Kachana	1 4
63.	Vipranarayana Charitra By Vijayaraghava Nayaka	1 4
64.	Kusalavopakhyanamu By Ramanarya	3 0
65.	Dwipada Bhagavatamu. Dasamaskandhamu	3 0
66.	*a.* Raghunathanayakabbyudayamu	
	b. Raghunathabhyudayamu By Vijayaraghava Nayaka	2 12
67.	Rajagopalavilasamu By Chengalva Kalakavi	3 0

For Copies apply to:—

THE HONY. SECRETARY,

T. M. S. S. M. LIBRARY, TANJORE. (South India)

PRINTED AT THE SRI VANI VILAS PRESS, SRIRANGAM—15-10-54.

THE JOURNAL OF
THE TANJORE SARASVATI MAHAL LIBRARY

EDITED BY

S. GOPALAN, B. A., B. L.,
Hony. Secretary, T. M. S. S. M. Library.

Vol. IX

No. 3

Published with the permission of
The Administrative Committee of the Library.

1954

Annual Subscription Rs. 2. Single Copy As. 12

LIST OF PUBLICATIONS OF

THE TANJORE MAHARAJA SERFOJI'S SARASWATI MAHAL LIBRARY, TANJORE.

Sanskrit Publications.

			Rs.	As.
1.	Gita Govinda of Jayadeva with Abhinaya		2	0
2.	Ayurvedamahodadhi—Annapanavidhi of Sushena		1	4
3.	Dharmakutam—(Sundara Kanda)	Half Calico	4	0
		Full Calico	4	8
4.	Jatakasaradipa by Nrisimha	Calico	14	0
		Ordinary	13	8
5.	Vishnutattva Deepika of Varkhedi Timmannacharya		2	0
6.	Sangeeta Darpanam of Chatura Damodara		3	0
7.	Bijapallavam (In the Press)		......	
8.	Sahendra Vilasam By Sridhara Venkatesa (AYYAVAL)		3	0
9.	Chola Champu Edited by Dr. V. Raghavan, M. A. PH D.		1	0
10.	Aswasastram with coloured illustrations	Rs. 14 ; 11 ; 10 and	9	0
11.	Samrajya Lakshmi Peethika		8	0

Sanskrit—English—Publications.

12.	Mudrarakshasa Nataka Katha of Mahadeva		2	8

Sanskrit—English—Tamil Publications.

13.	Viswakarma Vastu Sastram with commentary (In the Press)		......	

Sanskrit—Tamil Publications.

14.	Rajamriganka with Tamil Translation		2	8
15.	Anandakandam with Tamil Translation		15	0
	Sanskrit alone.		10	8
	Tamil Translation alone.		5	8
16.	Nadee Chakram with Tamil meaning (In the Press)		......	

Sanskrit—Tamil—Marathi—English Publications.

17.	Natya Sastra Sangraha		15	0

Tamil Publications.

18.	Sarabendra Vaidyamurai—Gunma Roga Chikitsai	Half Calico	3	8
		Full Calico	4	0

चन्द्रावतंसचरणाब्जपरागरेखे
  त्वत्साम्यलेशसुभगानि रजांसि बिभ्रत् ।
जातं जनार्दनभुजान्तरतोऽपि रुच्यं
  पङ्केरुहं किमपि मन्दिरमिन्दिरायाः ॥ ३० ॥

नखेन्दुसारैर्विमलीकृताङ्गा
  भर्तुश्शिवायाः पदपांसुभेदाः ।
श्रुत्यङ्गनानां सुखविश्रमार्थं
  तल्पालकल्पस्फुटकुन्दराशिः ॥ ३१ ॥

श्रीकण्ठपादपीठे
  स्फाटिकलिङ्गेषु नखरुचिमयेषु ।
मुनिभिः पादपरागाः
  मुक्ता इव भान्ति मालतीकलिकाः ॥ ३२ ॥

मृदुभिः पदपल्लवं पुरारे-
  र्मुनिसन्दोहमनोभिरप्यलभ्यम् ।
वहति स्म पदारविन्दरेणो
  मकुटीसीमनि मालिकामिव त्वाम् ॥ ३३ ॥

भक्त्या महत्या भवपादमूलं
  शक्तिव्रजानां समुपाश्रितानाम् ।
सम्बन्धतस्ते चरणाब्जरेणो
  पुष्पैस्सपर्या पुनरुक्तमास्ते ॥ ३४ ॥

नखांशुजालैर्नवराजहंसे
  स्फुटे तटाके पदपाटलिम्नि ।
केचित्परागाः क्रमितुर्भवान्याः
  कुर्वन्ति शङ्कां कुमुदाङ्कुराणाम् ॥ ३५ ॥

आभातिरम्याहरिणाङ्कमौळे
  राम्नायतः स्वीकृतदिव्यगन्धा ।
पादप्रभापाटलवल्लिकायाः
  प्रसूनमालेव परागपाळिः ॥ ३६ ॥

आनन्दनाट्यसमये हरिणाङ्कमौळे-
  रुन्नम्रपादकलितापरमाणुरेखा ।
तस्मै प्रसूनकलिकेव जटाप्रनृत्य-
  द्भागीरथीकरयुगाञ्जलिना वितीर्णा ॥ ३७ ॥

सोमावतंसचरणाब्जपरागपाळि-
  र्व्योमापगाकलितकाञ्चनपङ्कजस्था ।
तद्रेणुजालकपटेन पदाम्बुजानां
  सादृश्यशिक्षणविधाविव साधु तेषाम् ॥ ३८

आदाय देवि भवतीं हरपादरेणो
  पद्मच्छलेकरतले रजसो मिषेण ।
गङ्गा पुनाति भुवनं खलु तन्महिम्ना
  शक्ता कथं यदि न चेद्भुवमस्पृशन्ती ॥३९॥

कलावदन्तःकरणे चरन्ती
  करोति शम्भोः पदपांसुरेखा ।
तवोल्लसत्पद्मभवप्रियायाः
  कचोत्पतत्कैतकरेणुशङ्काम् ॥ ४० ॥

प्रणामकाले भगवत्पदाब्जा-
  त्सक्तानिटालेष्वणवो मुनीनाम् ।
आभान्ति वातोन्नयने हृदब्जा-
  न्नासापुटोत्था इव रेणुभेदाः ॥ ४१ ॥

विश्वस्य नेतुर्विशिखाविहारे
  पुरस्समिन्धे पदरेणुरेखा ।
कैवल्यलक्ष्म्या करसंगृहीता
  मधूकमालेव मुनीन्वरीतुम् ॥ ४२ ॥

पुष्पं च कैतकमिदं परितो विशुद्ध-
  मुत्तंसय त्वमिह चन्द्रकलामिवेति ।
अभ्यर्थनाय पदपङ्कजमाश्रितायै
  तद्रेणवश्शिवपदाम्बुजयोः परागाः ॥ ४३ ॥

तरुणशशिजटाले ताण्डवोद्दण्डयत्ने
  चरणभुविनटन्त्यास्तत्प्रभाव्याजनस्थाः ।
करकमलवितीर्णाः केऽपि पुष्पप्रभेदा
  नवसविधसमुद्यत्पांसुसङ्घा हि नूनम् ॥ ४४ ॥

विधिवत्परिगृह्य विश्वनेतुः
  पदरेणून्परमर्षयश्शिरोभिः ।
लघु तेन समग्रपुष्पलाभा-
  मुदितां ज्ञानलतां वहन्ति केऽपि ॥ ४५ ॥

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि

कुसुमपद्धतिस्समाप्ता ।

श्रीशिवपादकमलरेणुसहस्रे

अथ प्रणामपद्धतिः ॥

श्रीगौरीशपदाब्जरेणुकणिकां तत्तादृशीं पावनीं
स्तोतुं नश्शिवरामदेशिककृपादृष्ट्या समष्टीकृताः
निश्शङ्कं विहरन्तु शङ्करजटालङ्कारचन्द्राङ्कुर-
ज्योत्स्नासौरभधोरणीकृतपरीरम्भानिगुम्भा-
गिराम् ॥ १ ॥

कलनाय सर्वजगतां शुभस्थितिं
बलनाय मौनिहृदये मरुच्छलात् ।
रजताद्रिदत्तरुचये पदाब्जयो
रजसे नमोऽस्तु रतिकान्ततापिनः ॥ २ ॥

अतर्क्यमहिमात्मने सदभिसन्धिमत्तारिणे
विशुद्धगुणधारिणे विमलचित्तसञ्चारिणे ।
नमःप्रकृतिनर्मणे नलिनवैरिचूडामणेः
पदाब्जरजसे भवप्रतिभुवे परस्मै मम ॥ ३ ॥

प्रणमदमरचूडारत्नसन्दोहगङ्गा-
द्रुहुविधरुचिभाजां भक्तसञ्जीवनानाम् ।
परमशिवपदाम्भोजातपांसुच्छटानां
प्रभवतु नतिरेषा प्रत्यहं मामकीना ॥ ४ ॥

चरणकमलपार्श्वे संवसद्भाग्यधूटी-
करकिसलयचञ्चच्चामरैश्चालिताङ्गाम् ।
भगवति पदरेणो पावनीं त्वामनन्या
सुरपरिषदुदारा सेवते मौळिभागैः ॥ ५ ॥

आसीः पुराणपुरुषादपि शूलपाणे-
राद्यं नमस्कृतिशतस्य पद सुराणाम् ।
पादारविन्दयुगळस्य परागरेखे
यस्तावकार्चनफलं ननु तत्प्रसादः ॥ ६ ॥

पादानपायिनि भवस्य परागरेखे
प्रातिरूक्प्रणयिभिर्मरुतां समूहैः ।
संप्रार्थिता सततमेव मनांसि तेषां
चण्डीश्वरेण च विना सफलीकरोषि ॥ ७ ॥

त्वामिन्दुशेखरपदाब्जपरागरेखे
भक्त्या कयापि दिविजाः प्रणतिक्रमेषु ।
आराधयन्ति च पुरेव चिरं पुरारे-
र्मन्दारमाल्यरजसा मकुटच्युतेन ॥ ८ ॥

नारायणे त्रिजगतामभिनन्दनीये
नम्रे पदाम्बुरुहयोर्नळिनाक्षजेतुः ।
उज्जृम्भसे पदरजः श्वसितैस्तदीयै-
र्विज्ञापनार्थमिव कर्णपदं विभोस्त्वम् ॥ ९ ॥

त्रिपुरदनुजजेतुः पादपद्मावतीर्णा-
न्नखशशिकृतवासान्निर्मलान्पांसुदम्भान् ।
मकुटहरिमणिश्रीमुग्धदूर्वाप्रवाळैः
प्रणतिषु किल शौरिः प्रीणयत्येणशाबान् ॥ १० ॥

त्वया सहैव स्थितिमाप्तुकामा
चिरं पुरारेश्चरणारविन्दे ।
पद्मालया वक्षसि पांसुरेखे
डोलायमानेव जनार्दनस्य ॥ ११ ॥

निजकान्तिधूतनळिनाप्तरोचिषे
निगमावतंसमहिमैकसम्पदे ।
रमणीयरूपमहते पदाब्जयो
रजसे नमोऽस्तु रतिकान्तविद्विषः ॥ १२ ॥

पुरस्थितिं प्राप्य पुरां विजेतु-
र्विहारकाले विविधान्सुरौघान् ।
आनन्दयन्नपि यस्य पांसो-
रियेष रीतिं पदयोर्नमस्तम् ॥ १३ ॥

कपालिपादाम्बुजपांसुरेखे
कृपावती त्वां सुकृती नरेन्द्रः ।
अशेषदुस्सौरभमुद्वहन्ती*
विशेषशेषामिव सेवते स्म ॥ १४ ॥

* 'अशेषतस्सौरभमुद्वहन्तीं' इति युक्तः पाठो भाति ।

श्रेणीं परागस्य शशाङ्कमौळेः
पादारविन्दे प्रणतौ गृहीताम् ।
मूर्ध्ना गजास्यः कलयन्समस्ते-
राद्यां सपर्यामुररीकरोति ॥ १५ ॥

विन्यासभेदे विधुखण्डमौळे-
रसमुत्थिता त्वं सरसानुरागा ।
अमर्त्यवर्गादधिकादपि त्वं
प्रणाममाद्यं प्रकटं विधत्से ॥ १६ ॥

पादारविन्दीयपराग शम्भो
रसक्तः किरीटे नमतां सुराणाम् ।
अज्ञत्वहेतोः प्रणतिप्रसक्ता-
न्मन्त्रान्विधत्से सकलांश्च मन्तून् ॥ १७ ॥

संरक्षणे चन्द्रकलापिनस्त्वं
पादाब्जरेणो प्रथमोत्थितासि ।
अतःपुरा त्वाम॰ ॰ः प्रगल्भाः
वहन्ति मूर्ध्ना विनतेन भक्त्या ॥ १८ ॥

गच्छन्तीं पुरतश्शम्भोर्विजेतुमिव नन्दिनम् ।
परमाम्नाय संवेद्यां प्रपद्ये पादरेणुकाम् ॥ १९ ॥

पादीयपांसो प्रणतौ पुरारे-
स्सम्पर्कपुण्येन तवैव नूनम् ।
या कापि वन्यौषधिरप्यजस्रं
माल्यं तुलस्या मधुसूदनस्य ॥ २० ॥

समर्पितं शार्ङ्गधरेण भक्त्या
नेत्राम्बुजं तच्चरणं(णे ?) पुरारेः ।
आदाय भूयः पदयोः पराग-
शीर्षेऽपि तस्मै पुनरप्यदास्त्वाम् ॥ २१ ॥

यात्योषधिप्रस्थमुमासहाये
पादाब्जरेणो प्रथमं त्वमासीः ।
हर्षास्पदं तत्पुरसुन्दरीणा-
माचारसेवाविधिभिर्विचित्रैः ॥ २२ ॥

पदसरसिजरेणो पार्वतीप्राणनेतुः
प्रणतिषु सुरसङ्घाः प्रत्यहं शीर्षदेशैः ।
प्रकटकलहभाजः प्राग्गृहीतुं भवन्तं
मकुटघटितघण्टामञ्जुनादच्छलेन ॥ २३ ॥

प्रस्थानकेळीसमयेषु नित्यं
बहिर्मुखाः केचन भक्तिभाजः ।
शिवाङ्घ्रिरेणून् शिरसा वहन्ते
शरीरसङ्गानिव तत्प्रसादान् ॥ २४ ॥

अप्राकृतजनवेद्यानखिलजगज्जालविदित-
पारम्यान् ।
प्रणुमश्शिवपदरेणून् पशुपतिसिद्धान्तसार-
सिद्धान्तान् ॥ २५ ॥

परशिवपदपद्मद्वन्द्वरेणो भवन्तं
कतिचन भुवि धन्याः कल्पयन्तश्शिरोभिः ।
परिणमितसुवर्णाः फालदुर्वर्णिनस्ते
यत इह शुचयोऽमी त्वं पुनस्सिद्धचूर्णम् ॥ २६ ॥

प्रणमत्त्रिदशेन्द्रमौळिपाळी
नवरत्नस्फुरिता शिवाङ्घ्रिरेणुः ।
परमाणुसमष्टिवत्ससमिन्धे
नवखण्डात्मकमेदिनी विधात्री ॥ २७ ॥

मुक्ताफलैर्विधुशिखागळितैस्सुभद्रा
कृष्णा च दानवरिपोर्मकुटेन्द्रनीलैः ।
रेणो शिवस्य पयोदरभितः प्रसक्त्या
भक्त्या नतेषु विजयं प्रकटीकरोषि ॥ २८ ॥

विलसन्ति नखाः पदाब्जरेणोः
पदयोस्सीमनि पार्वतीधवस्य ।
सविधं गमिता इवेन्दुरेखा
मकुटारोहणसाहसापनुत्यै ॥ २९ ॥

नाथस्य वन्दनविधौ निटिले विलग्ना-
नादाय वत्सलतया हरपादरेणून् ।

मात्रार्पितान्मकुटसीम्नि वहन्विधाता
बद्धोऽपि नाभिकुहरे बहुनन्दति स्म ॥ ३० ॥

शम्भोः प्रणामसमये मणिकुट्टिमस्य
सङ्कर्षणाद्विकसितं विधुनाभिपद्मम् ।
धर्तुं भवन्तमिव पादपराग वेगा-
दुद्गच्छता विघटितं कमलासनेन ॥ ३१ ॥

चेतः स्थिताश्चिरसमाधिषु शार्ङ्गपाणेः
पादाब्जरेणुविसराः प्रमथाधिनेतुः ।
द्रष्टुं स्वजन्मभवनं प्रणतौ त एव
चञ्चन्ति नाभिकमलस्य रजोमिषेण ॥ ३२ ॥

पादाम्बुजोद्भवरजःपटलं पुरारे-
स्सङ्गृह्य नाभिनिवसद्रजसश्छलेन ।
तद्धारणादुदितसिद्धिवशादशेषा-
न्मायामयीं यवनिकां नयते मुकुन्दः ॥ ३३ ॥

धृत्वा भवन्तमहिभूषणपादरेणो
साष्टाङ्गवन्दनविधौ सहसा मुरारिः ।
त्वच्चन्द्रिकासमुदयैस्तरुणेन्दुगौरै-
र्निर्माति मौळिशिरसा§निमिषस्रवन्तीम् ॥ ३४ ॥

कृपया भवपादपद्मरेणो
कठिने चेतसि मामके विहर्तुम् ।
लभसे ननु योग्यतां सुराणां
नमतां मौळिषु दुस्सहैः प्रचारैः ॥ ३५ ॥

परागशम्भोः पदपद्मवासिन्
त्वं सर्वदाप्यप्रसवस्वभावः ।
संवासशीलस्तदपीह चित्रं
शुद्धान्तकान्ताचिकुरस्थलीषु ॥ ३६ ॥

चिरन्तनसरस्वतीचिकुरबन्धसन्धुक्षण-
क्षणप्रसृतकुङ्कुमद्युतिभरं भवानीशितुः ।
प्रणम्रमकुटच्छटाप्रथमशैलशृङ्गस्थली-
प्रसाधनधुरन्धरं पदरजस्तदिड्डीमहि ॥ ३७ ॥

परस्य शम्भोः पदसन्निकर्षा-
त्पवित्रमूर्तिं पदपांसुरेखे ।
अलब्धपादाम्बुरुहास्सुरास्त्वा-
मुत्तंसयन्ते तदिहोत्तमाङ्गैः ॥ ३८ ॥

पादाब्जरेणुकणिके परमस्य शम्भोः
प्राप्ता किरीटपदवीं प्रणमज्जनस्य ।
तीर्थैरनन्यसुलभैस्तव कान्तिपूरै-
स्सर्वोत्तरैः स्नपयसीव शुभार्थिनस्तान् ॥ ३९ ॥

गौरीशपादसरसीरुहपांसुरेखा-
मूरीकरोति शिरसा तरसा जनो यः ।
सोऽयं त्वया सह चिरं शमवज्जनाना-
मश्नाति चेतसि वसन्नधिकां सपर्याम् ॥ ४० ॥

अणुतामधिकं समुद्वहन्तो-
ऽप्यगजानायकपादयोः परागाः ।
मकुटेषु समर्पिता महद्भि-
र्महितां तद्गुरुतां भजन्ति चित्रम् ।॥ ४१ ॥

नमत्सु नाकिप्रवरेषु शम्भोः
पादद्वयं प्रौढसरोजमिश्रम् ।
तन्मौळिभादिव्यसरित्तटेषु
रेणुस्समुत्था नववालुकैव ॥ ४२ ॥

प्रणतौ प्रतिपद्य पद्मयोनेः
पुरजेतुः पदजातपांसुराशिः ।
मुखसीमनि शोभते श्रुतीना-
मिव मूर्ता समुदीतजीवपङ्क्तिः ॥ ४३ ॥

§ 'मौळिशिरसा'–अयुक्तोऽयं पाठो भाति ।

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि
प्रणामपद्धतिस्समाप्ता ।

श्रीशिवपादकमलरेणुसहस्रे

अथ स्तुतिपद्धतिः ॥

चेतस्सरोरुहसमुन्मिषदद्रिकन्या-
सीमन्तकुङ्कुमरुचा सरसानुरक्ता ।
तुष्टूषतो धुरि शिवाङ्घ्रिरजांसि सद्यो
विद्योततां मम वशे गृहिणीव वाणी ॥ १ ॥

अणिमादिसिद्धयस्ता
यूयं पदकमलपांसवश्शम्भोः ।
अत एव सर्वसिद्धी-
रनुमन्यन्ते भवद्भिरर्वाञ्चः ॥ २ ॥

विज्ञानार्णवतोषणैकरसिका विद्याप्रवालाङ्कुरा
विश्वोत्तारणकारणैकतरणिप्रौढिप्रियंभावुकाः ।
विश्वैक्यप्रतिपत्तिसौख्यलहरीसम्बन्धसम्बोधिनी
विश्वेशस्य पदाब्जरेणुकणिका विश्वोत्तरावर्त्तताम्
॥ ३ ॥

आविद्यकेषु विषयेषु समेधितस्य
जन्तुव्रजस्य तिमिरच्छिदि दुष्करायाम् ।
साम्यं भजन्ति शिव ते पदपांसवोऽमी
विज्ञानदीपकलिकाजठरैस्स्फुलिङ्गैः ॥ ४ ॥

अस्वादितुं निगमसारमनन्यलभ्यं
पादारविन्दयुगळीमनुवर्तसे त्वम् ।
पादाब्जरेणुकणिके परमस्य शम्भो-
र्यद्यत्नतो न लभते यमिनां समूहः ॥ ५ ॥

नित्यं पुनर्भवपदं व्रजतेति फाले
यैरक्षराणि लिखितानि नखैर्जनस्य ।
तस्मिन् शिवाङ्घ्रिकणिके भवतीं स्तुवाने
प्राप्तं पुनर्भवपदं खलु तैर्विधातुः ॥ ६ ॥

विधुर्वा विष्णुर्वा पुरभिदथ यः कोऽपि जगतां
स्वतन्त्रो निश्चेतुं न भवति विकल्पैः कबलितः ।
मुनीनामित्येवं समुदितवितर्काकुलधियां
त्वमेवासीस्तत्त्वं त्रिपुरहरपादाम्बुजरजः ॥ ७ ॥

शम्भोश्चिरं परिचयात्पदपङ्कजाभ्यां
मृत्युं निहन्तु स भवान् भवपादरेणो ।
संसारघोरविषनिग्रहणे गळैक-
साध्ये कुतः कुशलता भवता गृहीता ॥ ८ ॥

साहाय्यकेन परिगृह्य पुरा पुरारि-
र्लालाटसक्षि चरणं च स सव्यमीशः ।
कामान्तकौ *व्यपनयद्भवपादरेणो
त्वं चेद्विदारयसि तावपि निस्सहायः ॥ ९ ॥

पदकिसलयशोभामञ्जरीभिस्सरागे
नखशशिनि पुरारेर्नित्यमुज्जृम्भमाणे ।
परमुपाचितहर्षा पादरेणो त्वमेषा
प्रकटयसि चकोरीरीतिमव्याजसिद्धाम् ॥ १० ॥

का मौनिचित्तनळिनी
कस्त्वं शिवचरणरेणुमार्त्ताण्डः ।
स्वैरं तथापि कुरुषे
सरळानि विकाससौरभाण्यस्याः ॥ ११ ॥

प्रायेण पावनतरा त्वमसि स्मरारेः
पांसो पदाम्बुरुहयोः श्रुतिजीवनाडी ।
यत्त्वं पुराणपुरुषस्य पदाम्बुजीयै-
रार्द्रीभवस्यनुपदं मकरन्दसारैः ॥ १२ ॥

पादारविन्दजरजः परमस्य शम्भो-
स्तेजोभरेण मसृणेन तमो निवार्य ।
अग्रेसरश्शमवतां हृदयान्तरिक्षे
त्वं चक्रबान्धवदशां लभसे जगत्याम् ॥ १३ ॥

करगतमिव विश्वं पश्यतां योगभाजां
किमपि चरणरेणो साञ्जनो दृष्टिभेदः ।

---

* 'व्यपनयेत्' इति पाठस्साधीयान् भाति ।

भवसि भुवननेतुश्चन्द्रिकाभिर्जटेन्दोः
प्रतिपदमपि सिक्ताः पूर्वभैषज्यभाजः ॥ १४ ॥

सेवारम्भे सुरपरिषदां शीर्षमाल्यप्रलुब्धैः
पादांभोजे स्मरविजयिनस्सम्पतद्भिस्सहर्षम् ।
अत्युत्सेकैरळिकलभकैः स्तूयसे पांसुरेखे
मुग्धारम्भैरिव समुदितैर्मञ्जुझङ्कारभेदैः ॥ १५ ॥

रेणो पदाम्बुजयुगस्य रतीशहन्तु-
र्नक्तंदिवं विहरसे नमतां शिरस्सु ।
भक्त्या कयापि भवती भगवत्युदारा
मौलिस्थलीर्नमयितुं महतां सुराणाम् ॥ १६ ॥

चन्द्रातपेन महता नखचन्द्रपङ्क्ते-
रेलालवैश्शिशिरितैः पदपांसुभेदैः ।
अन्विष्य खिन्नमनसो हरपादपद्मं
मुञ्चन्ति हि श्रमभरं श्रुतयो मृगाक्ष्यः ॥ १७ ॥

मृदुनो मृदुपादजं रजस्त्वं
महिताम्नायसमूहसङ्गदूरम् ।
*अनुलिम्पति तेजसा रजस्त्वा-
मनुरूपेण पदाब्जसम्भवेन ॥ १८ ॥

अवाङ्मनसगोचरं चिरममर्त्यहृद्भूचरं
कणीकृतचतुर्मुखं कृततपोवदन्तस्सुखम् ।
रजः किमपि कौतुकं रचयतु प्रभावास्पदं
शिलादिसुतजीवितं शिखरिधन्वनः पादयोः ॥

सरसीषु नखेन्दुचन्द्रिकासु
स्फुरतां संयमिचित्तहंसकानाम् ।
गुरुतामुदयं समेष्यतां त्वं
कणिका कापि कपर्दिपादरेणुः ॥ २० ॥

प्रथयत्यभितो निजध्वजाग्रे
चरणं चन्द्रधरस्य पादपांसो ।
भवता बिरुदाङ्कवर्णभासा
त्रिजगत्पालनपाण्डितीप्रशस्तिम् ॥ २१ ॥

परागरेखा पदपङ्कजस्था
करोतु काम्यानि कपर्दिनो नः ।
उदेष्यतां चन्द्रमसां पदाब्धौ
सुधीमयानामिव बीजराशिः ॥ २२ ॥

पादारविन्दजनिते ननु पांसुरेखे
त्वां तर्कयन्ति कृतिनस्तरुणेन्दुमौळेः ।
लीलागृहाणि विदधातुमिव श्रुतीनां
विन्यस्तशङ्कुविततिं कृतिना विधात्रा ॥ २३ ॥

पादारविन्दजपराग पुरां बिजेतुः
त्वत्कान्तिपूरवलिते ललिते पदाब्जे ।
सन्ध्यामुखेषु विनमत्सुरमौलिरत्न-
ज्योतींषि तत्र दिनदीपदशां भजन्ते ॥ २४ ॥

दुस्तर्कतन्त्ररचनापटुभिः कुवादै-
रसङ्घर्षणाद्बहुमलीमसितेषु नूनम् ।
दीप्तिर्भवाङ्घ्रिजरजस्सततैधमाना
निर्माति कामपि मुदं निगमाशयेषु ॥ २५ ॥

अभ्यर्णमागतवताममरप्रभूणां
मौळिस्थलीविगळितैर्मणिकान्तिपूरैः ।
रेणो शिवस्य पदयोर्नखरालवाले
विज्ञानकल्पलतिकेव समेधसे त्वम् ॥ २६ ॥

विभावयन्तस्सुचिरं हृदि त्वां
विभोः पदाम्भोजरजस्सुधीन्द्राः ।
अज्ञातवृत्तान्तमपि स्मरारेः
पादाम्बुजं तत्परमं वदन्ति ॥ २७ ॥

तरुणं तरुणेन्दुखण्डमौळे-
श्चरणाम्भोरुहसम्भवं रजस्त्वम् ।
कठिनं मम मानसं विमुच्य
स्मरणेनैव विदारयस्यघानि ॥ २८ ॥

विहारकाले विधुखण्डमौळे-
स्सम्पर्कपुण्यैस्सकला भवत्याः ।
पादाब्जरेणो मणिपादुका त्वां
मञ्जीरनादैर्मधुरं स्तुवीते ॥ २९ ॥

---

* कर्तृकर्मकारकास्फूर्तिः ।

निशेशमौळेः पदपांसुरेखे
पिशाचभावं समुपेयुषां त्वम् ।
ददासि भस्मप्रकृतिप्रवादं
विदारणार्थं दुरितव्रजानाम् ॥ ३० ॥

विहारशीली(शैली ?) तव पादरेणो
पदे न चित्रं परमं पुरारेः ।
चिराय तत्र स्थितिमाभजन्त्यो-
ऽप्युत्तंसयन्ते श्रुतयो यतस्त्वाम् ॥ ३१ ॥

विहारशैली मकुटे श्रुतीनां
किं ते विचित्रं शिवपादरेणो ।
पादारविन्दे श्रुतिमौळिगम्ये-
ऽप्यवारणीयस्तव यद्विहारः ॥ ३२ ॥

व्याळीविषैर्विगतजीवभरस्य जन्तो-
स्संसारतापकपठैश्शिवपादरेणो ।
मूर्ध्नां क्षणेन भवतो वहनं गृणन्ति
सञ्जीवनं ननु चिरागमभैषजज्ञाः ॥ ३३ ॥

परस्य शम्भोः पदपद्मरेणो
समाश्रितेभ्यस्सततं मुनिभ्यः ।
चिन्मुद्रिकाया श्छलतो वहंस्त्वां
पारम्यमीशः प्रकटीकरोति ॥ ३४ ॥

नखचन्द्रिकालवाले
सुदृशा त्रय्या सुबुद्धिलतिकायाः ।
उप्तानि चन्द्रमौळेः
पादरजांसीव बीजरूपाणि ॥ ३५ ॥

उत्तेजितेषु कवयत्कविताभिधेषु
प्रत्युप्तहेमसुपुनर्भवशाणचक्रे ।
पादाम्बुजस्य गळिताः कमितुर्भवान्या
रेणूत्कराः पदसरोरुहपांसुरेखाः ॥ ३६ ॥

सद्यस्तनानि किसलयानि विजित्य गाढं
शम्भोः पदाङ्गुळिदळैः परिकल्पितानि ।
रेणुच्छलेन ललिते पदपट्टमध्ये
मूर्तानि केपि कलयन्ति जयाक्षराणि ॥ ३७ ॥

उद्गायतस्तव गुणान् चतुरोऽपि वेदा-
न्नूनं सरोजनिलयस्य चतुर्मुखीं ताम् ।
शम्भोः पदाम्बुजरजस्सततं दधानां
त्यक्त्वालुनात्तदधिकं वदनं पुरारिः ॥ ३८ ॥

पादपङ्कजयुगाभिधाम्बुधौ
जृम्भिते नखसुधांशुमण्डलैः ।
शैलजासहचरस्य सर्वत-
स्सञ्चरन्ति तिमयो रजश्छलात् ॥ ३९ ॥

सम्भाविताश्चिरतरं भिषजा भवेन
सारैर्नखेन्दुकिरणामृतसङ्गृहीतैः ।
उज्जीवनाय जगतां भवरोगभाजां
सत्यं भवन्ति भवपादपरागखण्डाः ॥ ४० ॥

आलोक्य दौस्थ्यमधिकं रतिनायकस्य
प्रत्यर्थिनो भगवतः प्रथमं गृहीतम् ।
माङ्गल्यपालनरसान् महितान् परागान्
मूर्ध्ना भजन्ति पदयोर्मुनिधर्मदाराः ॥ ४१ ॥

परस्य शम्भोः पदपद्मदेशे
विहारभाजां श्रुतिसुन्दरीणाम् ।
गोभिः स्वकीभिः किल गोपनार्थं
सालं विधत्से चरणाब्जरेणो ॥ ४२ ॥

पादारविन्दात्परमस्य शम्भोः
परागरेखे प्रणयादुदीताम् ।
प्रवर्तमानं महतां विभूत्यै
लीलावतारं भवतीं प्रतीमः ॥ ४३ ॥

क्षिप्रं प्रसूय शिवपादपरागदम्भा-
नण्डोत्करानुदितत्तद्धरणानुरागा ।
हन्तुः पुरां चरणसारसमाश्रयन्ती
श्रुत्यङ्गना विजयते स्फुटराजहंसी ॥ ४४ ॥

साकं गिरीन्द्रसुतया चरति स्मरारौ
पादारविन्दगळितां परमाणुरेखे ।
कैलासशैलवनिकासु मनोरमासु
मन्यामहे मनसि दिव्यमहौषधीं त्वाम् ॥ ४५ ॥

कात्यायिनी सहचरे सति गाहमाने
मोहव्यथां शमयितुं मुनिमानसानि ।
उत्पत्तये सवितुरुज्ज्वलबोधनाम्नः
पांसुच्छटा चरणयोः प्रथमा हि सन्ध्या ॥ ४६ ॥

शेषा यदि स्युरखिला अपि जीवसङ्घा-
स्सर्वार्थसाधनचणाः पृथगेव शब्दाः ।
बुद्धिश्च चाक्षुषमयी सकला तथापि
स्तुत्या शिवाङ्घ्रिरजसां न गुणार्णवोऽपि॥४७॥

निरन्तरं शङ्करपादरेणू-
न्निरूपयन्ते वचनैस्स्वकीयैः ।
तेऽमी भवन्त्यागमसूक्तिसारै-
र्वेद्यस्वभावा भुवि निर्विशङ्कम् ॥ ४८ ॥

पादारविन्दमकरन्दरसप्रवाहे
मज्जन्मुहुर्मदनसूदनपादरेणो ।
तेनैव तत्सदृशसारवतां कवीनां
प्रीतिं करोषि वचसां परिपाटिकासु ॥ ४९ ॥

श्रीरङ्गसीम्नि पदपद्ममयेपुरारे-
स्तत्कान्तिपूरविसरैस्सकवेरजाते ।
तन्मूर्तिरेव भवती भवपादरेणो
गुप्ताजिरं विहरते भुवनं पुनाना ॥ ५० ॥

आजिघ्रतस्तव पराग पदाब्जसार-
माम्नायसारमकरन्दमयं पुरारेः ।
आस्वादने मम गिरामपि ते रुचिः स्या-
न्माधुर्यमूढरसनस्य यथाम्लशाके ॥ ५१ ॥

एकशिशोऽपि पदरेणुकणाभवद्भि-
स्साकंददाति कुशलं निजसेवकेषु ।
स्वाधीनभृत्यजनसंसदमन्तरेण
को वा बहूनपि जगत्यवतिप्रगल्भः ॥ ५२ ॥

विमला हि चरणवृत्ति-
श्चक्षुश्रवसो मनोज्ञरूपकथा ।
चरितं तवाद्य रेणो
चित्रं भुवि भाति चन्द्रचूडस्य ॥ ५३ ॥

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि
स्तुतिपद्धतिस्समाप्ता ।

श्रीनिवासविरचितं

सुमनोरञ्जनम् ॥

[हरिचरितात्मकं काव्यम्]

—◇—

प्रथमस्सर्गः ।

बाललीला ।

श्रीमान्वेङ्कटनाथो विभुर्विजयते निरङ्कुशचरित्रः ।
येन यशोदानन्दावाभीरकुले प्रतिष्ठितौ पितरौ ॥ १ ॥

विबुधाराध्या सुरभिर्यदि वा गोष्ठान्तरुपगता सुकृतैः ।
आत्मा तोष्यस्सुधिया परसुखजनकैश्च सरससाहित्यैः ॥ २ ॥

अमितास्त्वया बहुमताः कविता वनिताश्च गोपवेषेण ।
कुब्जावदियं कुब्जा हृदयाब्जालिङ्गनं करोतु हरे ॥ ३ ॥

ननु किमिति याचितव्यो ग्रन्थालोकं प्रसह्य बुधवर्गः ।
यस्य च मतिप्रदस्त्वं हृत्स्थो मे ग्रथितवान् हरे ग्रन्थम् ॥ ४ ॥

बहवो बहून् भजन्तां भजे पदाङ्गुष्ठमेव ते भगवन् ।
श्रीरीप्सिता त्रिभुवनैस्त्वया त्वदोष्ठस्तदीप्सितोयमभूत् ॥ ५ ॥

अवतीर्णस्य यदुपतेश्चक्रादिषु समयमीक्षमाणेषु ।
पानविधाने पयसः प्रथमं कम्बुर्हि सफलतां भेजे ॥ ६ ॥

यस्यैकोछ्वासार्हे पयसि ब्रह्माण्डकोटिशतमाहुः ।
तं स्नपयन्ती जननी जलं पिबेदिति करं भ्रुवोर्निदधे ॥ ७ ॥

क्रोडीकृतं कचौघं मौक्तिकजालेन वेष्टितं दृष्ट्वा ।
हरिमजगणन् बुधगणाः पूर्णेन्दुधरो हरः किमेष इति ॥ ८ ॥

कौस्तुभरहितोऽपि हरिश्शार्दूलनखेन शोभते सुतराम् ।
अमुना गोसुखहेतोश्शार्दूलो निर्णखः कृतो नूनम् ॥ ९ ॥

निधिरसुरकृत्रिमानां निजदृष्ट्योरुपनिरुद्ध इव शुक्रः ।
व(क्ष)सि मुक्ता भाति हरेर्लब्धः किल बहुकल्पयोगोऽस्मात् ॥ १० ॥

कटिकनककिङ्किणीभिर्बालस्य हरेस्तनु स्फुरति नीला।
रजनिरिव रत्नदीपैस्स्मितश्रियोच्चैश्चकास्ति च मुखेन्दुः ॥ ११ ॥

कटकोर्मिकाः करस्थास्स्मितास्पदं रिङ्गतो हरेरभवन्।
पृष्ठे तदीर्ष्यया ननु कलहायन्ते मिथोऽङ्घ्रिकिङ्किण्यः ॥ १२ ॥

नवनीतमेकपाणौ कलयन् भीरुर्हरिस्तिरश्चीनः।
रिङ्गातिकुटिलं कुटिलं कुटिलो हारो ललाटिका च बभौ ॥ १३ ॥

नन्दाङ्गणं विरेजे रिङ्गति कृष्णे पदाम्बुरुहकिरणैः।
स्थलपद्मिनीव फुल्ला ताण्डवरङ्गं रमादेव्याः ॥ १४ ॥

क्षीराब्धिशयो भगवान् करं प्रसार्य नवनीतमनुयाचन्।
नटति पटान्तं धृत्वा भाग्यमहोऽनुपमं यशोदायाः ॥ १५ ॥

आशान्तरे प्रशान्ते गोरसमाहृत्य गोपगेहेषु।
क्षुधमुद्दिश्य यशोदा पिनष्टि चेदौषधं हरिर्हसति ॥ १६ ॥

चषकेन पाययन्त्यां तिक्तं मातरि हरेर्मुखोद्गीर्णम्।
नाभौ स्तिमितं शुशुभे स्मृत्वा तनयं विधिं वितीर्णमिव ॥ १७ ॥

कुतुकाय नन्दगोपे लतया तर्जयति हरिरहो धावन्।
जेता सुरासुराणां विवर्तितमुखो विलोकते भूयः ॥ १८ ॥

उदरे वलयो लुप्तास्तथापि किं कृष्णमुञ्चसि न पायसम्।
इति निगदन्त्यां गोप्यां नाभिबिलं दर्शयन्हरिः पातु ॥ १९ ॥

श्यामं स्निग्धं मुग्धं दुग्धकणैर्दिग्धमच्युतस्याङ्गम्।
वदनाब्जं भ्राजयते सतारमभ्राङ्कणं सुधांशुमिव ॥ २० ॥

बिभृते यस्याज्ञां सुरासुरैरपि दुरासदः कालः।
तं प्रेक्ष्य सापराधं लूतापुञ्जेन भीषयति गोपी ॥ २१ ॥

तट्यां कलिन्दजायाः कट्यां दृढबद्धकनककौशेयः।
क्रीडां चकार बहुधा व्रीडां कृष्णो विहाय गोपसखैः ॥ २२ ॥

यं शिशुमारमूर्तिं दिवि रविचन्द्रादयः प्रदक्षन्ते।
तं परितो भ्रामन्तश्शाटीखेलां व्रजा मिथश्चक्रुः ॥ २३ ॥

युधि संहर्तुं दनुजान् प्रागवकाशाद्गमागमौ ज्ञातुम् ।
चक्रेण शुष्कतन्त्रं कारयति गुणं निबध्य ननु शौरिः ॥ २४ ॥

यो भ्रामकस्त्रिजगतां भ्रामयते दारुरचितमावर्तम् ।
उन्नयते पवनपटं यो देवः स्थापको ध्रुवस्यासीत् ॥ २५ ॥

प्राङ्नाभीकमलपुटे कं ब्राह्मणं तु कं शिशुमधार्षीत् ।
अधुना तमेव जाने करयोर्लालयति पातने भीरुः ॥ २६ ॥

येषां यासां पिदधे दृशौ कराभ्यां हरिस्त्वपर्याये ।
भूतं भविष्यदलपन्परोक्षविषयान्परेङ्गितार्थमपि ॥ २७ ॥

न च मुरलीं न च कुरलीं पदयुगलीं केवलं तव विजाने ।
सह निवसन्नपरिहसन्वहसंमानमिति कोऽपि हरिमूचे ॥ २८ ॥

व्ययध्वं नैव भजध्वं प्रणिधध्वं गोरसं गवेषध्वम् ।
विषमे मां कलयध्वं हरिरित्थं प्रियसखानुपादिक्षत् ॥ २९ ॥

व्रजपुरमविशत्कृष्णस्तत्प्रीत्यै गोगणं च दुग्धाब्धिः ।
सुदृशां हृदयं मदनो यमुनातटकाननं वसन्तोऽपि ॥ ३० ॥

कालिन्दीतटतरवो दिवस्पृशः कुसुमभूषिता भान्ति ।
अभ्युद्गतास्सुरतरुं क्षितितलमानेष्यमाणमिव हरिणा ॥ ३१ ॥

यमुना तदा चकाशे कलिन्दसिन्धोस्स्फुटाब्जकुमुदौघैः ।
चूडामणिमेखलयोर्धरया पृष्ठे परिष्कृता वेणी ॥ ३२ ॥

यमुनातटविपिनेषु व्यभिचरिताव्रततयो वसन्तेन ।
परमामोदं प्रापुस्तदा तथा युवतयोऽप्यनन्तेन ॥ ३३ ॥

इति श्रीनिवासरचिते सुमनोरञ्जननाम्नि हरिचरित्रे
बाललीलावर्णनं प्रथमस्सर्गः ।

द्वितीयस्सर्गः ।

मुरळीवर्णनम् ।

अधुना यमुनासविधे गवां गणैः परिवृतो विभासि हरे ।
अम्बुधिमथने तटभुवि शिरोघटितकरयुगैरिव सुरौघैः ॥ १ ॥

आप्रपदीनं दीप्रं कटितटसन्दानितं कनकवासः ।
स्फोरयति सखिमुकुन्दं मिळिन्दमिव केतकीकुसुमम् ॥ २ ॥

रत्नमुकुटतोऽप्यधिकं रमापते बर्हिबर्हमर्हति ते ।
स्मरसृष्ट्यै स्वीचक्रे शिवेर्ष्यया शिरसि शिशिरमिव नयनम् ॥ ३ ॥

नखमणिकिरणैररुणा स्फुरति हरेर्धेनुचारिणी यष्टिः ।
पदजां विरुध्य गङ्गां सेर्ष्या समजनि सरस्वतीव करात् ॥ ४ ॥

गोगणचारणहेतोः करे धृता शोभते हरेर्यष्टिः ।
भक्तजनान् भवसिन्धौ तारयितुं क्षेपणीव संगुप्ता ॥ ५ ॥

यमुनातटे यदुवरं यष्टिधरं दानवा विजानन्ति ।
निजसोदरीसदनगो दण्डधरो मृत्युरेवेति ॥ ६ ॥

रूपेण विजितमदनो युवति कटिद्वीपमेत्य तद्राज्यम् ।
धरसि परिमाणदण्डं न तु यष्टिं कृष्ण पाशुपाल्यस्य ॥ ७ ॥

कुटिलालके ललाटे तिलकधरः कोऽपि बालको गोपः ।
श्यामश्चन्द्रकचूडो धेनूश्चारयति वादयति मुरळीम् ॥ ८ ॥

मुरळीजुषो मधुमुषः पदाब्जमेकं विपर्ययोदस्तम् ।
हृदि पश्यतीव लक्ष्मीं स्मृत्वा संवाहनं सनातनिकम् ॥ ९ ॥

हरिरेकपदा तिष्ठति भूमेर्भारं जिहीर्षुरित्येव ।
निजरूपमुत ज्ञातु भक्तेभ्यो दर्शयति चरणरेखाः ॥ १० ॥

आदाय बलेर्विभवं विक्रीतं पदसरोजमेकमभूत् ।
एकपदावससि हरे न परस्वं व्यपजिहीर्षुरेवेति ॥ ११ ॥

बालश्चरणमचुम्बः कराम्बुजाभ्यां हरे समुन्नीय ।
मुरळीस्थं निजविभवं द्रष्टुमसूयोन्मुखस्सखस्त्वधुना ॥ १२ ॥

बहुजन्मसु तपसित्वा नन्देन कृतो हरे त्वमधमर्णः ।
एकेन पदातिष्ठंस्तद्दणं जानामि सुष्ठु वारयसि ॥ १३ ॥

एकं तव चरणाब्जं परिगृह्णीते नमस्कृतीर्नमताम् ।
अन्यदिदं जानीमः कृत्वा छायां निवारयति तापम् ॥ १४ ॥

मुरलीं त्वदधरभाजं समीक्ष्य धेनुः स्वयं तथा नेति ।
उद्विग्ना पृष्ठगता नतमौलिर्लेढि तव पदं शौरे ॥ १५ ॥

ननु राम एव कृष्णो व्रजमुपपन्नोऽसि गोपवेषेण ।
शर एव यष्टिरभवद्धनुरेव बभूव मुरलिरिति मन्ये ॥ १६ ॥

नाभौ स्थितं विरिञ्चिं वेणुव्याजात्कराब्जयोर्धृत्वा ।
चिरशिथिलान् फणसि पुनर्निगमान् श्वासात्मकान् हरे नूनम् ॥ १७ ॥

करयुगचपलाङ्गुलिभिस्तवमुरलीरवयुजौ भुजौ शौरे ।
भजतामिह परसुखदौ पल्लविताविव सुरद्रुमौ लसतः ॥ १८ ॥

वदनं तव भाति हरे शशीरथस्थो धुरामुरलिरस्य ।
श्रुतिकुण्डले रथाङ्गे धावत्तुरगाङ्घ्रयः कराङ्गुल्यः ॥ १९ ॥

करयुगळनखरकिरणैस्स्मितरोचिभिस्तनुप्रभाभिरपि ।
जातवरुणा जातवमला जातु च नीला बभौ हरेर्मुरळी ॥ २० ॥

शौरे त्वदधरलग्ना मुरळी भात्यमृतयन्त्रनळिकेव ।
यस्या बिलान्तरेभ्यो वहन्त्यमृतनिर्झराः स्वरमिषेण ॥ २१ ॥

श्रुत्वा तव मुरलिरवं नमयति न फणीफणां चिरोन्नीताम् ।
वदनान्तरे गृहीतं तृणमपि हरिणी हरे न चर्वोति ॥ २२ ॥

व्रजमवतीर्णे कृष्णे सकलाः कन्याश्च यौवनं प्रापुः ।
मुरलीनादं श्रुत्वा नाभिबिलोत्थेव रोमततिभुजगी ॥ २३ ॥

शिवधनुषो रामकृतं शकलयुगं चिरकरानुषङ्गार्थि ।
यष्टिमुरळ्यौ भूत्वा भजते कृष्णं स्मरो ह्यतो वशगः ॥ २४ ॥

कुड्मलिताधरकोणाद्विनिस्सृतां मुररिपोर्मुरलिमूर्ध्नि ।
स्मितरुचिमविदुः प्रमदा ध्वजदण्डे योजितां स्मरेण पटीम् ॥ २५ ॥

अङ्गुळयस्तव शौरे चलन्ति मुरळौ यथा चपलचपलाः ।
श्रुतनिक्वाणाः प्राणा भवन्ति सुदृशां तथा तरळतरळाः ॥ २६ ॥

मुरळिरवो निरवयवो यदुवर तव परिचरो भवति मदनः ।
यदयं हृदयं मदयन्नदयं त्वदपेक्षितां हरति सुदतीम् ॥ २७ ॥

ध्वनयति मुरळीं कृष्णे युवतिषु कामश्शरं न हि क्षिपति ।
सन्धाय धनुषि गणशो युवतीरेवास्य चरणयोः क्षिपति ॥ २८ ॥

हरिमुरळीमाकर्ण्य द्रवत्सु गोगोपिकाकदम्बेषु ।
गळदाम्नां कटिदाम्नां नाथाश्चिन्वन्ति किङ्किणीः पथिषु ॥ २९ ॥

वीथ्यां काचन कान्ता धावन्ती मुरळिनादसंभ्रान्ता ।
शुशुभे गलितपटान्ता सुमशरशकटीव कुचखगाक्रान्ता ॥ ३० ॥

शौरेः करौ मुरळ्यां घनरागपरौ यथा यथा भवतः ।
स्त्रैणं प्रतार्य मुरळी तथा तथा घनकुचौ दिशति ताभ्याम् ॥ ३१ ॥

भगवति हरौ गोपाले कम्बुर्भवति स्म वेणुरिति विभ्रः ।
निजधावल्यगुणमसौ द्योतयति व्रजवधूकपोलेषु ॥ ३२ ॥

सप्तस्वरैरुपेतो बाहाभिस्सप्तभिः कृशानुरिव ।
मुरळिरवस्तापयते सखिवेणुभवं ध्रुवं दवं जगदुः ॥ ३३ ॥

श्वासश्वसनश्शौरेर्मुरळीनादं सखि प्रयुङ्क्ते यत् ।
विरहव्याजेन बत प्रहिणोति स्वसखमेव खलु शिखिनम् ॥ ३४ ॥

श्वसनभवत्वात्तेजो रविर्भवति सखि हरेर्मुरळिनादः ।
सप्तस्वरतुरगाढ्यं स्यन्दनमासाद्य हन्त तापयति ॥ ३५ ॥

वेणुर्विभाति कोशो वेणुरवो नन्दकस्सखि विभाति ।
एनं हरिः प्रयुङ्क्ते लज्जाकान्तारकृन्तनाय खलु ॥ ३६ ॥

पूर्वं यथा वसिष्ठः स्मरस्तथा समभिमन्त्रयन् दण्डम् ।
किरति शरान् सखि नूनं न माधवो न मुरळी न च ध्वनयः ॥ ३७ ॥

करकमलाभ्यां शौरिर्मुरळीमन्थानदण्डमुद्धृत्य ।
शब्दगुणे व्योमाब्धौ कृतयत्नः स्वरसुधां सखि चिनोति ॥ ३८ ॥

आरूढाऽप्यवरूढा मुरळी करलाघवान्मुहुश्शौरेः ।
मुञ्चति नैवाधरमिति सखि चित्रं वेद्मि कोऽनुबन्धोऽयम् ॥ ३९ ॥

मुरळीरवेण पौरांस्तेन च वाणी रसेन मित्राणि ।
ताभ्यां चाधरमधुना कृष्णमुखविधुः पुपोष गोपवधूः ॥ ४० ॥

सूर्यात्मजैव यमुना भूभृद्वंशोद्भवैव मुरळिरपि ।
दूत्य हरेरकुरुतां व्रजललना व्यभिचरन्ति न हि चित्रम् ॥ ४१ ॥

मुरळौ भ्रान्तां कान्तां गवेषमाणे समागते रमणे ।
तां भुजगीं गोचरयन्साक्ष्यं चुम्बति हरिर्हसन्त्यपराः ॥ ४२ ॥

कक्षे निवेश्य यष्टिं यदसौ मुरळीं बिभर्ति हरिरधरे ।
परिहृत्य पूर्णगर्भामपूर्णगर्भां हि रमयते तन्वीम् ॥ ४३ ॥

वेणुभवं तव निनदं स्तम्भभवं नरहरिं हरे वेद्मि ।
यःप्रह्लादमभिलषंस्तज्जनकं हन्ति मानिनीमानम् ॥ ४४ ॥

वेणुमगस्त्यं च हरे कलयामि स मौकरीरसम्भवात् ।
क्षाराब्धिं स तु सुपुवे त्वदधरभागिक्षुसिन्धुमेवायम् ॥ ४५ ॥

तव वदनश्वसनभवो मुरळिरवो यदुपते भवति हनुमान् ।
नो चेत्किमयं शकिता त्वत्प्रीत्यै कुचनगान् समाहर्तुम् ॥ ४६ ॥

चिरमपि धृता कराभ्यामङ्गुळिचलनान्तराळविरहमसौ ।
असहिष्णुर्मूर्च्छेति खलु मुरळौ वद कृष्ण कोऽनु रोगोऽयम् ॥ ४७ ॥

वनमालाविभ्राजं यदुराजं निशि गृहागमनभाजम् ।
मुरळीमुग्धैः फणिभिः परितो दीपायितं स्फुरन्मणिभिः ॥ ४८ ॥

सायं गोगणपृष्ठे सहगोपैर्मुरळिवादनो वीथ्याम् ।
कृष्णो रजसाप्यरुणः कृष्णो व्यरुचद्वधूकटाक्षौघैः ॥ ४९ ॥

द्वारमुपगते कृष्णे कृत्वा नीराजनं प्रमोदेन ।
आशिश्लेष यशोदा तथैव राधाऽपि किन्तु कामवती ॥ ५० ॥

इति श्रीनिवासविरचिते सुमनोरञ्जननाम्नि हरिचरित्रे
मुरळीवर्णनं द्वितीयस्सर्गः ।

ஸ்ரீ சாகஜிராஜன் காலத்திய இசைக் கவிகள்

ஸ்ரீ வாசுதேவ கவியின் இசையிலக்கியத் தொடர்

N. V. வெங்கடசுப்ரம்ஹண்ய சாஸ்திரி
ஸம்ஸ்கிருத பண்டிதர், ஸரஸ்வதிமஹால் நூல்நிலையம்.

தௌத்ய பஞ்சகம்

'ஸ்ரீவாசுதேவ கவியின் 'दौत्यपञ्चकं' என்பதுபற்றிச் சென்ற மூன்றுமித ழில் குறிப்பாகச் சொல்லியிருப்பது ஞாபகத்திலிருக்கலாம். இங்கே, அதனை விவரிப்போம்.

ஒரு நாயிகை, தனது காதலனை சகஜிராஜனைக் காமுற்று, காதலால் பரிதபிக்கின்ருள். அப்போது அவள் தனது பரிதாபகரமான நிலையைத் தனது காதலனுக்குக் கிளி, கார், வண்டு, அன்னப்பேடு, தோழி இவர் வாயிலாகத் தெரிவிக்கின்ருள். இதுவே 'दौत्यपञ्चक' த்தின் சாரம்.

இதை விவரிபபதின் முன், दौत्य' த்தற்கும், 'सन्देश' த்திற்குமுள்ள பேதத்தைக் கூறுவோம்.

'சந்தேசம்' என்பது; ஒரு விஷயத்தைக் கடிதத்தின் மூலமாகவோ, வாய் வார்த்தையாகவோ, ஒருவருக்குத் தெரிவிபபது. இந்த சந்தேசத்தைச் சாமான்யமாகப் பிராணிகள மூலமும, சாதாரண மனிதன் மூலமும தெரிவிக்கலாம்.

'தௌத்ய' மென்பது; தனது எஜமானனால் இடப்பட்டக் கட்டளையைத் தேச காலமறிந்து, எதிராளியின மனமறிந்து தனது திறமை, அறிவு யிவற்றைப பயனபடுத்திச் சாதித்தலாகும். இதனைச் சாதிக்க விசேஷ அறிவுடையவனே தகுதியுள்ளான். 'நைடத' ததில், அன்னமும, 'ஸ்ரீராமாயண' த்தில், அனுமானும் தூதனைச் சேர்ந்தவர்களாவார்கள்.

இந்த தூதர்கள் மூன்று விதம்.-உத்தமன், மத்யமன், அதமன் என.

உத்தமதூதன் இலக்கணம்:-

நல்ல படிபபும், எஜமானனிடம் விசேஷ விச்வாஸமும், தேசகாலமறிந்து காரியம் கைக்கொள்ளும திறமையும, எஜமானனிட்ட காரியத்தைச் செய்வதோடு அதை யனுசரித்துப் பல்வேறு காரியங்களைச் சாதித்தலும், சுயநலங் கருதாமையும், உததமன் இலக்கணமாகும்.

மத்யமன் இலக்கணம்:-

எஜமானனிட்ட காரியத்தைச் செவ்வனே சாதிப்பான். அதையனுஸரித்து மற்றுமனேக விஷயங்களைச் சாதிக்க வல்லவனல்ல. மற்றவை உத்தமனுடைய போன்றதேயாகும்.

அதமன் இலக்கணம்:-

முக்ய காரியத்தை யனுஸரித்துப் பல காரியங்களைச் சாதிக்காததோடு; முக்ய காரியத்தையும் திறமையில்லாமையினாலோ தேச கால விரோதத்தினாலோ, கவனக்குறைவினாலோ சுயநலத்தினாலோ தவற விட்டுவிடுவான்.

ஆகவே; காரியத்தின் தாரதம்யத்தைக் கவனித்துத் தகுந்த தூதர்களை சோதித்தனுப்புவது எஜமானனின் கடமையாகும். ஆகவே, முன்கூறியதுபோல, நைடதத்தில் வரும் அன்னப்பறவையைப்போலும், ராமாயணத்திலுள்ள அனுமானைப்போலும், மனிதனல்லாப் பிறவினங்களிலும் 'दौत्य' த்திற்கு வேண்டிய விசேஷமான அறிவுடையவர்களிருப்பதாலும்; மனிதவர்க்கத்திலும் 'सन्देश' த்திற்கும் தகுதியற்றவரிருப்பதாலும், இது 'सन्देश' மா? दौत्य' மா? என்பதை நமது பகுத்தறிவாலறியவேண்டியது.

दौत्यपञ्चकम् ।

[ஸ்ரீ வாசுதேவகவின் தெய்வ வணக்கம்]

श्रीशाहराजमभिवीक्ष्य विमोहितायास्तद्दूत्यपञ्चकमिदं सरसीरुहाक्ष्याः ।
श्रीवासुदेवकविरद्य वदामि वाणीपादाम्बुजातयुगलीं शिरसा दधानः ॥ १ ॥

ச்லோகம் 1 (கருத்து)

[ஸ்ரீ வாசுதேவ கவியென்ற நான், ஸ்ரீ சாகராஜனைக்கண்டு மோகங்கொண்ட தாமரைக்கண்ணியொருத்தி, விடுத்த 'தூதுகளினைந்தைக்' கலைமகளின் தாமரைப்பதங்களிரண்டையும் தலைமேற் கொண்டவனாகச்சொல்லுகிறேன்]

दूत्यम् १ ।

நாயிகை முதலாவதாக தன் கணவனிடம் கிள்ளையைத் தூது விடுகின்றாள். ஆம்! தன் கையினாலேயே நாடோறும் பாலும் பழமும் கொடுத்து வளர்க்கப்பட்டது. பேசவும் பழக்கி வைக்கப்பட்டிருக்கிறது. அனுதினமும் இணைபிரியாது குழவிபோல் தனது கரத்திலேயே தரிக்கப்பட்டு வருகிறது. எப்போதும் தனது சுக துக்கங்களைக் கூடவேயிருந்து, அனுபவிக்கின்றது. இவ்வாறிருக்க, ஏன் தன்பொருட்டுத் தூதுசென்று, தன் நிலையைக் கணவனிடம் தெரிவிக்காது? என்ற நம்பிக்கைதான்.

दरुः १ ।

सततं क्षीरादिभिर्मया लीलाशुक त्वं संवर्धितोऽसि दयया ।
सुतनिर्विशेषतया सन्ततं हस्ते सुतरां धृतोऽसि लीलया ॥ १ ॥
करुणां मयि निधाय लीलाशुकत्वं कान्तं संप्राप्य त्वरया ।
विरहं ममाभिधाय लीलाशुकत्वं वीरं शाहेन्द्रमानय ॥ २ ॥

इत्थं तया समभिवर्ण्य शुको विसृष्टः श्रीशाहराजसविधं प्रतिगत्य शीघ्रम् ।
तद्दत्तदिव्यफलतोषितचित्तवृत्तिः तत्रैव सञ्चरति विस्मृतदूत्यकृत्यः ॥ २ ॥

ச்லோகம் 2 (கருத்து)

நாயிகையால் இவ்வாறு வருணித்து, அனுப்பப்பட்ட கிளி; ஸ்ரீ சாகராஜனின் சமீபத்தை விரைவிலடைந்தும், 'கிளி பேசுகின்றது' என்ற வியப்பினால், அரசனாலளிக்கப்பட்ட சிறந்த கனிவர்க்கம் முதலியவற்றால் மனமுவந்து, தன் காரியத்தை மறந்து, அங்கேயே சஞ்சரிக்கலானது.

दूत्यम् २ ।

நாயிகையோ! கிள்ளை வரும் வழியை நோக்கி நோக்கி, அயர்ந்து போனாள். அவள் தனது துக்கத்தைப் பரந்த வானத்துடன் ஒப்பிடுபவள் போல ஆகாயத்தை நோக்கியவாறேயிருந்தாள். அப்போது 'அபயம், அளிப்பதுபோல் இடிமுழக்கி யெதிரே தோன்றிய மேகத்தைக் கண்டாள். மயில் போல மனங்களித்தாள். ஆம்; உலகத்தோர் வாழத் தன வாழ்வைக் குறைத்துக்கொள்ளும் மஹான்களைக் கண்டால் துன்பமடைந்தவன் சந்தோஷிப்பது இயற்கையல்லவா? அந்த மேகத்தைத் தூது விடுகின்றாள்:-

பரோபகாரத்தின் பொருட்டே பிறந்த மேகமே! உலகத்தில் தாவரம் முதலிய எல்லாப் பிராணிகளுக்கும், தண்ணீர் இல்லாவிடில் உயிர் வாழமுடியாது. ஆகையால்தான் நீருக்கு 'जीवनं' என்று பெயர். அதை யளிப்பவனோ நீயேயாகும். உன்னாலேயே உலகம் வாழ்வு பெறுகின்றது. உன்னாலேயே செடிகொடிகள் முதலியவை தழைத்து வளர்ந்து சந்தோஷிக்கின்றன. அப்படியிருக்க உன் எதிரில் நான் வாழ்வு பெறாமல் மரிக்கலாமோ நீர் சுமந்து நிற்கும் மேகமே! என் விஷயத்தைச் சுமப்பது உனக்கு பாரமோ? உலகின் தாபத்தைப் போக்கவே நீரைச்சுமக்கும் மேகமே! உனக்கு என் தாபத்தைப் போக்குவதும் தர்மமன்றோ? மகாவிஷ்ணுவின் அடிமலரில் மனதையீடுபடுத்திய பக்தர்கள், அண்டியவரைக் காப்பாற்றாது கைவிடுவரோ; நீயும் விஷ்ணுபதத்தில் (ஆகாயத்தில்) ஸஞ்சரிப்பவனன்றோ!

கடலடுத்து; உப்புநீரை நன்னீராக்கிச் சுமந்துவந்து, தாபமுள்ள இடத்தை இங்கிதத்தாலறிந்து; பொழிந்து; குளிரச்செய்யும் தயையுள்ள மேகமே! மன்னனையடுத்து; அவன் மனம் என்வசமாக்கி அழைத்துவந்து, மன்மதன் கணைகளால் அடிபட்டுத் தபிக்கும் என் தாபத்தைப் போக்கிக், குளிரச் செய்வதுனது கடமையல்லவோ? ஆகையால் மன்னனை விரைவி லழைத்து வருவாயாக.

दरुः २।

त्वं जीवनं हि जनानां वारिवाह लोके त्वं माता सर्वौषधधीनां वारिवाह ॥ १ ॥
अञ्जसा मां पालय त्वं वारिवाह नित्यमच्युतपदसंचारिन् वारिवाह ॥ २ ॥
अङ्गजबाणविलूनं वारिवाह पश्य अङ्गं मदीयं दयालो वारिवाह ॥ ३ ॥
इङ्गितज्ञोऽसि नितरां वारिवाह जगदीशं शाहेन्द्र मानय वारिवाह ॥ ४॥

श्लो–३ संप्रार्थितः प्रमुदितः सुजनेन गत्वा श्रीशाहराजमथ भोसल वंशरत्नम् ।
तद्दानवर्षमवलोक्य वलाहकोऽपि तत्रैव तिष्ठति विलज्जितहृष्टचेताः ॥ ३ ॥

ச்லோகம் 3 (கருத்து)

இவ்வாறு, நாயிகையினால் வேண்டப்பட்ட மேகமானது; சந்தோஷ மடைந்து, விரைவில் போஸலகுலத்திற்கு இரத்தினம் போன்ற சாகஜி ராஜனையடைந்து; ஆங்கு அவனுடைய ஈகைப் பெருமழையைக் கண்ணுற்று, வெட்கி, உணர்வற்றமனமுடையதாய்; அங்கேயே நின்றுவிட்டது.

नृत्यम् ३।

வானம் கடந்து சென்ற மாமுகில் மருமுறை வரக்காணோம். மனம் வெதும்பி நிற்கின்றாள் பேதை, அந்தோ! பாவம்; அவள் படும் பாட்டைக் காதலின் வலி தெரிந்தவொரு ரசிகனேதான் அறியக்கூடும். ஆம்; நானி ருக்க நீ வருந்தவேண்டாமென்பதுபோல, ரஸிகனென வண்டொன்று யாழொலி பரப்பி அவளெதிரே காட்சியளிக்கின்றது. அவள் நினைக்கின்றாள்— ரஸிகனை இந்த வண்டைத் தூது விட்டால் தன் விரகம் தீர்ந்துவிடுமென்று. ஏன்? பழக்கத்தை மிகவும் பாராட்டிப் பழகியவரைக் கைவிடாது காப்பாற் றும் நல்லோரிலும், பழக்கத்தைப் பொருட்படுத்தாது, வஸ்துவின் பெருமை யறிந்து விவேகத்துடன் அதில் ஈடுபடும் ரஸிகனே சிறந்தவன்; நேற்று தனக்கு மது அளித்து, மகரந்தம்பூசி, இடங்கொடுத்த மலராயிற்றே என் றும்; பழகியவரைக் கைவிடலாகாதென்றும்; வாடிய மலரிலேயே ஈடுபடாது; புதுமணமும், தேனும் நிரப்பி, மலர்ச்சியுடன் நிற்கும் புதுமலரை, ஸாரா ஸார விவேகத்துடன் வஸ்துவின் கௌரவமறிந்து, நாடுகின்ற இவ்வண்டு ரஸிகசிரோமணியல்லவா? ஆகையால், இவ்வண்டு உலகத்தின்கண் உத்தம நாயக நாயிகைகளான எங்கள் விரகத்தைச் சகிக்காது, தூது சென்று, தனது காதலனையழைத்து வருமென்று எண்ணினாள் போலும்.

பூக்களின் ஸாரமான தேனைத் தேடிச் சேகரிக்கும் வண்டே! உன்னைத் தவிர, என் விரகத்தைத் தலைவனான சாகேந்திரனிடம் யார் சொல்லப்போகிறார்கள்? ஒருவரையுங் காணோம். அழகிய பூங்கொத்துக்களில் விளையாடி, மீசைகளில் மகரந்தம் பூசி, மதத்துடன் ஒலிக்கும் வண்டே! பூவிலும் மிருதுவான, கருணைத்தேன் நிரம்பிய நல்மனமுடைய என் காதலனை யடைந்து எனது விரகத்தைச் சொல்லவேண்டுகிறேன். தேனைத் தேடித்திரியும் வண்டே! உன் போலவே நானும், தேனிலுமினிய என் நாயகனைத் தேடிநிற்கின்றேன். அவனை நாடும் மனமுடைய எனக்கு அணிகள் பிடிக்கவில்லை. குளிர்ந்த சந்திரனும், குற்றங்களுக்கு இருப்பிடமாகி, சூரியனிலும் கொடுமை கொண்டு, கோபத்துடன் துன்புறுத்துகிறான். எனவே, என்பொருட்டு தயைகொண்டு, தூது செல்ல வேண்டும், என வேண்டினாள்.

दरुः ३ ।

करवाणि किं मधुकर इदानीमहं वरशाहेन्द्रे मन्मोहवक्तारो न दृश्यन्ते ॥
सुमनोगणविहारिन् भो मधुव्रत क्रमशो ममानुरागं
भ्रमराधिप निवेद्य तमिहानय शाहेन्द्रम् ॥
भूषाकर्म न रोचते दोषाकरो हिमांशू रोषेण मां तुदति पूषा किमयं न जाने ॥
मानितसत्कवीन्द्रं नानाकलाकलापं ज्ञानैकधीरं नाथमानय शाहेन्द्रम् ॥

श्लो ४ दृप्तः शाहनृपोद्यानपुष्पमाध्वीकपानतः ।
तत्र वन्येऽवसद्गायन् भृङ्गः प्रस्थितवाचकः ॥

ச்லோகம் 4 (கருத்து)

தூது சென்ற வண்டோ, அரசனின் அழகிய பூந்தோட்டத்தில் மனம் போனபடி தேனையுண்டு, மதங்கொண்டு, பாடிக்கொண்டு, தன்னையும், தனது கார்யத்தையும் மறந்து வசித்தது. அந்தோ! குடிகாரனிடமும் பாடகனிடமும் வைத்த நம்பிக்கையின் கதி என்னே!

दूत्यं ४ ।

மறைந்த வண்டும் திரும்பக்காணோம். மனம் நொந்தாள். விடன் போலும், அவ்வப்போது பயன்படும் மலர்களை நாடும் சுயநலம் படைத்து, சஞ்சல மனமுடைய, வண்டை நம்பி மோசம் போனேன். ஆம், இந்த ஆண்களையே நம்பலாகாது. பெண்ணுக்குப் பெண் எப்போதும், எக்காரியத்திலும் உதவி புரிவார்களென்பதை மறந்தேன். ஏன் இப்போதுதானென்ன? இதோ அருகிலுள்ள வாவியில் மனங்களித்து விளையாடும் அன்னப்பேடை தூது அனுப்புகிறேன், என முயலுகின்றாள். ஒய்யாரமான நடையில் ஒற்றுமையிருப்பதனால் வசப்படுத்த முயன்றாள் போலும்:—

அன்னங்களில் சிறந்த இனத்தைச் சார்ந்து, அழகு மிக்க ஏ ராஜஹம்ஸி! உன் பெண்மை அனுபவத்தில், கணவனைப்பிரிந்த துக்கம் எவ்வாறு

